Mahalakshmi Ashtakam

महालक्ष्म्यष्टकम्

NityaPaath
nityapaath.com/mahalakshmi-ashtakam/

SHLOKA · श्लोक

1 नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते।
शङ्खचक्रगदाहस्ते महालक्ष्मि नमोऽस्तु ते॥ १॥

Namastestu mahamaye shripithe sura pujite.
Shankha chakra gada haste Mahalakshmi namostu te.

2 नमस्ते गरुडारूढे कोलासुरभयङ्करि।
सर्वपापहरे देवि महालक्ष्मि नमोऽस्तु ते॥ २॥

Namaste garudarudhe kolasura bhayankari.
Sarva papa hare devi Mahalakshmi namostu te.

3 सर्वज्ञे सर्ववरदे सर्वदुष्टभयङ्करि।
सर्वदुःखहरे देवि महालक्ष्मि नमोऽस्तु ते॥ ३॥

Sarvajne sarva varade sarva dushta bhayankari.
Sarva duhkha hare devi Mahalakshmi namostu te.

4 सिद्धिबुद्धिप्रदे देवि भुक्तिमुक्तिप्रदायिनि।
मन्त्रपूते सदा देवि महालक्ष्मि नमोऽस्तु ते॥ ४॥

Siddhi buddhi prade devi bhukti mukti pradayini.
Mantra pute sada devi Mahalakshmi namostu te.

5 आद्यन्तरहिते देवि आद्यशक्तिमहेश्वरि।
योगजे योगसम्भूते महालक्ष्मि नमोऽस्तु ते॥ ५॥

Adyanta rahite devi adya shakti maheshvari.
Yogaje yoga sambhute Mahalakshmi namostu te.

6 स्थूलसूक्ष्ममहारौद्रे महाशक्तिमहोदरे।
महापापहरे देवि महालक्ष्मि नमोऽस्तु ते॥ ६॥

Sthula sukshma maha raudre maha shakti mahodare.
Maha papa hare devi Mahalakshmi namostu te.

7 पद्मासनस्थिते देवि परब्रह्मस्वरूपिणि।
परमेशि जगन्मातर्महालक्ष्मि नमोऽस्तु ते॥ ७॥

Padmasana sthite devi para brahma svarupini.
Parameshi jagan matar Mahalakshmi namostu te.

8 श्वेताम्बरधरे देवि नानालङ्कारभूषिते।
जगत्स्थिते जगन्मातर्महालक्ष्मि नमोऽस्तु ते॥ ८॥

Shvetambara dhare devi nanalankara bhushite.
Jagat sthite jagan matar Mahalakshmi namostu te.

PHALASHRUTI · फलश्रुति

9 महालक्ष्म्यष्टकं स्तोत्रं यः पठेद्भक्तिमान्नरः।
सर्वसिद्धिमवाप्नोति राज्यं प्राप्नोति सर्वदा॥ ९॥

Mahalakshmy ashtakam stotram yah pathed bhaktiman narah.
Sarva siddhim avapnoti rajyam prapnoti sarvada.

10 एककाले पठेन्नित्यं महापापविनाशनम्।
द्विकालं यः पठेन्नित्यं धनधान्यसमन्वितः॥ १०॥

Eka kale pathen nityam maha papa vinashanam.
Dvi kalam yah pathen nityam dhana dhanya samanvitah.

11 त्रिकालं यः पठेन्नित्यं महाशत्रुविनाशनम्।
महालक्ष्मीर्भवेन्नित्यं प्रसन्ना वरदा शुभा॥ ११॥

Tri kalam yah pathen nityam maha shatru vinashanam.
Mahalakshmir bhaven nityam prasanna varada shubha.

Text checked against: Gita Press, Gorakhpur: Devi Stotra Ratnakar (code 1774), Sanskrit with Hindi translation. Meanings, audio and all scripts at nityapaath.com/mahalakshmi-ashtakam/